॥ श्रीः ॥

# ॥ ಶ್ರೀಕಮಲಜದಯಿತಾಷ್ಟಕಮ್ ॥

ಶೃಂಗಕ್ಷ್ಮಾಭೃನ್ನಿವಾಸೇ ಶುಕಮುಖಮುನಿಭಿಃ ಸೇವ್ಯಮಾನಾಂಘ್ರಿಪದ್ಮೇ
ಸ್ವಾಂಗಚ್ಛಾಯಾವಿಧೂತಾಮೃತಕರಸುರರಾಡ್ವಾಹನೇ ವಾಕ್ಸವಿತ್ರಿ ।
ಶಂಭುಶ್ರೀನಾಥಮುಖ್ಯಾಮರವರನಿಕರೈರ್ಮೋದತಃ ಪೂಜ್ಯಮಾನೇ
ವಿದ್ಯಾಂ ಶುದ್ಧಾಂ ಚ ಬುದ್ಧಿಂ ಕಮಲಜದಯಿತೇ ಸತ್ವರಂ ದೇಹಿ ಮಹ್ಯಮ್ ॥

ಕಲ್ಯಾದೌ ಪಾರ್ವತೀಶಃ ಪ್ರವರಸುರಗಣಪ್ರಾರ್ಥಿತಃ ಶ್ರೌತವರ್ತ್ಮ-
ಪ್ರಾಬಲ್ಯಂ ನೇತುಕಾಮೋ ಯತಿವರವಪುಷಾಗತ್ಯ ಯಾಂ ಶೃಂಗಶೈಲೇ ।
ಸಂಸ್ಥಾಪ್ಯಾರ್ಚಾಂ ಪ್ರಚಕ್ರೇ ಬಹುವಿಧನುತಿಭಿಃ ಸಾ ತ್ವಮಿಂದ್ವರ್ಧಚೂಡಾ
ವಿದ್ಯಾಂ ಶುದ್ಧಾಂ ಚ ಬುದ್ಧಿಂ ಕಮಲಜದಯಿತೇ ಸತ್ವರಂ ದೇಹಿ ಮಹ್ಯಮ್ ॥

ಪಾಪೌಘಂ ಧ್ವಂಸಯಿತ್ವಾ ಬಹುಜನಿರಚಿತಂ ಕಿಂ ಚ ಪುಣ್ಯಾಲಿಮಾರಾತ್
ಸಂಪಾದ್ಯಾಸ್ತಿಕ್ಯಬುದ್ಧಿಂ ಶ್ರುತಿಗುರುವಚನೇಷ್ವಾದರಂ ಭಕ್ತಿದಾರ್ಢ್ಯಮ್ ।
ದೇವಾಚಾರ್ಯದ್ವಿಜಾತಿಷ್ವಪಿ ಮನುನಿವಹೇ ತಾವಕೀನೇ ನಿತಾಂತಂ
ವಿದ್ಯಾಂ ಶುದ್ಧಾಂ ಚ ಬುದ್ಧಿಂ ಕಮಲಜದಯಿತೇ ಸತ್ವರಂ ದೇಹಿ ಮಹ್ಯಮ್ ॥

ವಿದ್ಯಾಮುದ್ರಾಕ್ಷಮಾಲಾಮೃತಘಟವಿಲಸತ್ಪಾಣಿಪಾಥೋಜಜಾಲೇ
ವಿದ್ಯಾದಾನಪ್ರವೀಣೇ ಜಡಬಧಿರಮುಖೇಭ್ಯೋಽಪಿ ಶೀಘ್ರಂ ನತೇಭ್ಯಃ।
ಕಾಮಾದೀನಾಂತರಾನ್ಮತ್ಸಹಜರಿಪುವರಾನ್ ದೇವಿ ನಿರ್ಮೂಲ್ಯವೇಗಾ-
ದ್ವಿದ್ಯಾಂ ಶುದ್ಧಾಂ ಚ ಬುದ್ಧಿಂ ಕಮಲಜದಯಿತೇ ಸತ್ವರಂ ದೇಹಿ ಮಹ್ಯಮ್॥

ಕರ್ಮಸ್ವಾತ್ಮೋಚಿತೇಷು ಸ್ಥಿರತರಧಿಷಣಾಂ ದೇಹದಾರ್ಢ್ಯಂ ತದರ್ಥಂ
ದೀರ್ಘಂ ಚಾಯುರ್ಯಶಶ್ಚ ತ್ರಿಭುವನವಿದಿತಂ ಪಾಪಮಾರ್ಗಾದ್ವಿರಕ್ತಿಮ್।
ಸತ್ಸಂಗಂ ಸತ್ಕಥಾಯಾಃ ಶ್ರವಣಮಪಿ ಸದಾ ದೇವಿ ದತ್ವಾ ಕೃಪಾಬ್ಧೇ
ವಿದ್ಯಾಂ ಶುದ್ಧಾಂ ಚ ಬುದ್ಧಿಂ ಕಮಲಜದಯಿತೇ ಸತ್ವರಂ ದೇಹಿ ಮಹ್ಯಮ್॥

ಮಾತಸ್ತ್ವತ್ಪಾದಪದ್ಮಂ ನ ವಿವಿಧಕುಸುಮೈಃ ಪೂಜಿತಂ ಜಾತು ಭಕ್ತ್ಯಾ
ಗಾತುಂ ನೈವಾಹಮೀಶೇ ಜಡಮತಿರಲಸಸ್ತ್ವದ್ಗುಣಾನ್ ದಿವ್ಯಪದ್ಯೈಃ।
ಮೂಕೇ ಸೇವಾವಿಹೀನೇಽಪ್ಯನುಪಮಕರುಣಾಮರ್ಭಕೇಽಂಬೇವ ಕೃತ್ವಾ
ವಿದ್ಯಾಂ ಶುದ್ಧಾಂ ಚ ಬುದ್ಧಿಂ ಕಮಲಜದಯಿತೇ ಸತ್ವರಂ ದೇಹಿ ಮಹ್ಯಮ್॥

ಶಾಂತ್ಯಾದ್ಯಾಃ ಸಂಪದೋ ಮೇ ವಿತರ ಶುಭಕರೀರ್ನಿತ್ಯತದ್ಭಿನ್ನಬೋಧಂ
ವೈರಾಗ್ಯಂ ಮೋಕ್ಷವಾಂಛಾಮಪಿ ಲಘು ಕಲಯ ಶ್ರೀಶಿವಾಸೇವ್ಯಮಾನೇ।
ವಿದ್ಯಾತೀರ್ಥಾದಿಯೋಗಿಪ್ರವರಕರಸರೋಜಾತಸಂಪೂಜಿತಾಂಘ್ರೇ
ವಿದ್ಯಾಂ ಶುದ್ಧಾಂ ಚ ಬುದ್ಧಿಂ ಕಮಲಜದಯಿತೇ ಸತ್ವರಂ ದೇಹಿ ಮಹ್ಯಮ್॥

ಸಚ್ಚಿದ್ರೂಪಾತ್ಮನೋ ಮೇ ಶ್ರುತಿಮನನನಿದಿಧ್ಯಾಸನಾನ್ಯಾಶು ಮಾತಃ
ಸಂಪಾದ್ಯಸ್ವಾಂತಮೇತದ್ರುಚಿಯುತಮನಿಶಂ ನಿರ್ವಿಕಲ್ಪೇ ಸಮಾಧೌ।
ತುಂಗಾತೀರಾಂಕರಾಜದ್ವರಗೃಹವಿಲಸಚ್ಚಕ್ರರಾಜಾಸನಸ್ಥೇ
ವಿದ್ಯಾಂ ಶುದ್ಧಾಂ ಚ ಬುದ್ಧಿಂ ಕಮಲಜದಯಿತೇ ಸತ್ವರಂ ದೇಹಿ ಮಹ್ಯಮ್॥

ಇತಿ ಶ್ರೀಶೃಂಗೇರೀಜಗದ್ಗುರು
ಶ್ರೀಸಚ್ಚಿದಾನಂದಶಿವಾಭಿನವನೃಸಿಂಹಭಾರತೀಮಹಾಸ್ವಾಮಿಭಿಃ ರಚಿತಂ
ಶ್ರೀಕಮಲಜದಯಿತಾಷ್ಟಕಂ ಸಂಪೂರ್ಣಮ್॥